Mayureshvara Puja

मयूरेश्वरपूजा

Document Information

Text title : Mayureshvara Puja

File name : mayUreshvarapUjA.itx

Category : ganesha, pUjA

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

sanskritdocuments.org

मयूरेश्वरपूजा

मयूरेश्वरपुरे चतुर्षु द्वारेषु अधिष्ठितानां देवतानां पूजनपुरस्सरं मयूरेश्वरपूजा भाद्रपदशुक्लप्रतिपदमारभ्य चतुर्थीपर्यन्तं आचर्यते । दाक्षिणात्यैरपि गाणपतैः कैश्चित् अयं पूजाक्रमोऽनुष्ठीयते । (द्वाराध्यक्षविषये मुद्गलपुराणे । माञ्जारी प्राच्यां, (आत्मनो जारभावं तु दर्शयन्ती निरन्तरम् । मोहयित्वा क्रीडति तेन स्वयं शक्तिरुत्तमा । माञ्जारी सा समाख्याता मां प्रति जारदर्शिनी । गणपः क्रीडति द्वन्द्वविहारस्थः तयासह ।)विरजा दक्षिणस्याम् । आश्रया प्रतीच्याम् । चतुर्थिका उत्तरस्यामिति विशेषः । भगवतो दिव्यं भुवनं स्वानन्दभुवनमिति, भूमौ तदेव मयूरेश्वरमिति (मोरेगांव)इति महाराष्ट्रेषु प्रसिद्धम् । माञ्जारीं मार्जारीं वदन्ति केचित् । अत्रतु माञ्जारी (मार्जारी)प्राच्यां, आश्रया दक्षिणस्यां, भोगदा प्रतीच्यां, कामदा उत्तरस्यामिति पूजाक्रमो दृश्यते सम्प्रदायगतः ।

पूजाक्रमः-

गुरुवन्दनम् । गणपति वन्दनम् । सङ्कल्पः -

ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं श्रीमयूरेश्वरानुग्रहसिद्ध्यर्थम् । एकभक्तव्रतग्रहणपूर्वकं भाद्रपदशुक्लप्रतिपदमारभ्य चतुर्थीपर्यन्तं चतुर्दिन साध्यां मयूरेश्वरपुर चतुर्द्वाराधिष्ठित देवतापूजा पूर्विकां मयूरेश्वरपूजां करिष्ये ।

(अप उपस्पृश्य । हरिद्राबिम्बे विघ्नेश्वरपूजा । ग्रहप्रीतिः प्रथमदिने)अस्यां प्रतिपदि मयूरेश्वरपुरपूर्वद्वाराध्यक्षायाः माञ्जारीदेव्याः पूजां करिष्ये

(कलशपूजा)

प्रथमायां पूर्वद्वाराध्यक्षपूजा

प्राग्द्वाराधिष्ठितां देवीं भक्तपापविमार्जिकाम् ।
माञ्जारीं कलयाम्यत्र व्रतस्य परिपूर्तये ॥

पूर्वद्वाराध्यक्षां माञ्जारीं (मार्जारीं)ध्यायामि ।

आवाहयामि माञ्जारीं मयूरेशाज्ञया स्थिताम् ।
मयूरेशार्चनार्थाय अनुज्ञां कुरु मे शिवे ॥ आवाहयामि ।
मयूरेशपुरः पूर्वद्वारे रत्नविनिर्मितम् ।
सिंहासनमिदं क्लृप्तं आतिष्ठार्चां गृहाण मे ॥ आसनम् ।
पाद्यं गङ्गापयः क्लृप्तं यवदूर्वाभिरन्वितम् ।
ददामि सुभगे देवि पङ्कक्षालनमस्तु मे । पाद्यम् ।
अर्घ्यं माञ्जारिके देवि गन्धपुष्पादिमिश्रितम् ।
हस्ते गृहीत्वा मत्पापं सम्प्रमार्ज्य कृपां कुरु ॥ अर्घ्यम् ।
सुगन्धवासितं तोयं मधुपर्कपुरस्तनम् ।
ददाम्याचमनं तुभ्यं कुरु माञ्जारि शोभनम् ॥ आचमनम् ।
मधुपर्कं मयानीतं दधिमध्वाज्यसंयुतम् ।
माञ्जारिके प्रतीच्छ त्वं मम पापापनुत्तये ॥ मधुपर्कः ।
मधुक्षीरसिताद्राक्षासर्पिर्भिः संस्कृतं नवम् ।
पञ्चामृतमिदं देवि स्नानाय प्रतिगृह्यताम् ॥ पञ्चामृतस्नानम् ।
कृष्णानदी समानीतं गन्धतैलादिपूर्वकम् ।
जलं स्नानाय सङ्क्लृप्तं स्नाहि माञ्जारिके सुखम् ॥ स्नानं, आचमनम् ।
शुक्लाम्बरयुगं सूक्ष्मं कार्पासपरिनिर्मितम् ।
परिवीय्य मयूरेशपदभक्तं विधेहि माम् ॥ वस्त्रम् ।
कटकाङ्गदकेयूरहारकङ्कणनूपुरैः ।
अलङ्कुरुष्व माञ्जारि मम सङ्कल्पभूषणैः ॥ आभरणानि ।
गन्धं ददामि सुरभिं श्रीखण्डागरुमिश्रितम् ।
विलेपनाय ते देवि गृह्यतां सुरपूजिते ॥ गन्धम् ।
जलस्थलरुहैः पुष्पैः मालां देवविनिर्मिताम् ।
प्रतिगृह्याशु माञ्जारि तुष्टा देवं प्रदर्शय ॥ मालिकाम् ।
जातीचम्पकपुन्नागकनकाह्वय कैतकैः ।
मल्लिकामालती पुष्पैः पूजयामि सुरेश्वरि ॥ पुष्पाणि ॥

अङ्गपूजा -(ॐ —— नमः ———- पूजयामि)
माञ्जार्यै -पादौ । गूढगुल्फायै -गुल्फौ । दीर्घजङ्घायै -जङ्घे ।
मुकुटजानुकायै -जानुनी । रम्भोरवे -ऊरू । शुभकट्यै -कटिम् ।
गम्भीरनाभये -नाभिम् । कृशोदरायै -उदरम् । पृथुवक्षसे -वक्षः ।
उन्नतकुचायै -कुचौ । वेत्रहस्तायै -हस्तौ । कम्बुकण्ठ्यै -कण्ठम् ।

शुचिस्मितायै -वक्त्रम् । दीर्घनासायै -नासिकाम् । विशालनेत्रायै -नेत्रे ।
श्रीकर्णायै -कर्णौ । तिलकभूषायै -ललाटम् । द्वारेश्यै -शिरः ।
माञ्जार्यै -सर्वाण्यङ्गानि ।
धूपं गृहाण हेरम्बपुरप्राग्द्वारदेवते ।
गुग्गुल्वगरु सम्मिश्रं ददाम्युत्तममादरात् ॥ धूपम् ।
दीपं ददामि ते दिव्यं वर्तित्रयसुयोजितम् ।
मङ्गलार्थाय सुज्योतिः गृह्यतां देवदूतिके ॥ दीपम् ।
पायसापूपकृसरचित्रान्नैः फलमिश्रितैः ।
नैवेद्यं प्रदास्यामि परितृप्ता भवेश्वरि ॥ नैवेद्यम् ।
पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् । ताम्बूलम् ।
नीराजनं प्रदास्यामि पञ्चभिर्धृतवर्तिभिः ।
सर्वमङ्गललाभायाप्यपराधक्षमाय च ॥ नीराजनम् ।
प्रदक्षिणनमस्कारान् ।
माञ्जारी त्वदनुज्ञया मम मयूरेशस्य सन्दर्शनं
तत्पादाम्बुरुहार्चनं भगवतः कारुण्यदृष्टिर्मयि ।
भूयात्प्रोष्ठपदस्य पूर्वदिनतः तत्राचतुर्थीदिनं
पूजार्थं मम योग्यतास्स्त्विति परं याचेऽद्य पूर्वाधिपे । (प्रार्थना ।)
अनया पूजया मयूरेशपुरपूर्वद्वाराध्यक्षा माञ्जारीदेवता प्रीयताम् ।
पूर्वद्वारे रमारमेशपूजा ।
सङ्कल्पः -
परमेश्वर प्रीत्यर्थं मयूरेशपुर पूर्वाङ्गदेवतयोः रमारमेशयोः पूजां करिष्ये ।
(कलश-शङ्खपूजे ।)
रमारमेशौ कलये प्राग्द्वाराङ्गतया स्थितौ ।
आद्ये दिने मयूरेशपूजाङ्गत्वेन सत्कृतौ ॥

रमारमेशौ ध्यायामि ।
आवाहयामि लक्ष्मीशौ सर्वसम्पत्प्रदौ नृणाम् ।
मयूरेशाज्ञया पूर्वद्वारदेशमुपाश्रितौ ॥ आवाहयामि ।
रत्नसिंहासनं देवौ उपवेशाय कल्पितौ ।
आस्तं मदीयपूजार्थं कुरुतं च कृपां मयि ॥ आसनम् ।
पाद्यमाद्यन्तरहितौ गृह्णीतं साक्षतं शुभम् ।

पादप्रक्षालनार्थाय द्विषन्नाशनं अस्तु मे ॥ पाद्यम् ॥

गन्धपुष्पकुशैर्मिश्रं गाङ्गतोयमिदं शुभम् ।
अच्छिद्रा सन्ततिर्मे स्यात् गृह्णीतं हस्तपङ्कजे ॥ अर्घ्यम् ।
आचम्येतां जगद्वन्द्यौ शुद्धतोयेन कल्पितम् ।
ददाम्याचमनार्थाय मधुपर्काङ्गमुत्तमम् ॥ आचमनम् ।
दधिमध्वाज्यसंयुक्तं मधुपर्कं मया हृतम् ।
लक्ष्मीनारायणावद्य गृह्णीतं परया मुदा । मधुपर्कः ।
क्षीराज्यमधु मृद्वीकाशर्कराफलकल्पितम् ।
पञ्चामृतस्नानमिदं कुरुतं प्रीतिपूर्वकम् । पञ्चामृतस्नानम् ।
गङ्गादिसरिदानीतैः तोयैर्गन्धादिवासितैः ।
अभिषेकं करोमीशौ पापाद्वारयतं च माम् ॥ स्नानं, आचमनम् ।
रमारमेश्वरौ देवौ पीताम्बरयुगं तथा ।
कञ्चुकं चोत्तरीयं च परिधत्तं महार्घवत् ॥ वस्त्रम् ।
उपवीतानि कार्पासनिर्मितानीह भक्तितः ।
मयानीतानि गृह्णीतं मम पापनिवृत्तये ॥ उपवीतम् ।
हारकङ्कणकेयूरनूपुरैः कुण्डलैस्तथा ।
ताटङ्कनासाभरणैः भूषयामि सुरेश्वरौ । आभरणानि ।
चन्दनागरुकर्पूररोचना मृगनाभिजम् ।
गन्धं गृह्णीतमाध्यौ वां मत्पङ्कस्य विशुद्धये ॥ गन्धम् ।
मल्लिकामालतीजातीनागकेसरचम्पकैः ।
भक्त्या समर्पितां मालां प्रतिमुञ्चतमादरात् ॥ पुष्पाणि ।
अङ्गपूजा -ॐ —— नमः ———– पूजयामि ।
रमारमेश्वराभ्यां -पादान् । सिन्धुजातत्पतिभ्यां -गुल्फान् । श्रीविष्णुभ्यां - जङ्घाः ।
लक्ष्मीनारायणाभ्यां -जानूनि । इन्दिरातत्पतिभ्यां -ऊरून् ।
मातापितृभ्यां -गुह्ये । सुकटिभ्यां -कटी । श्री दामोदराभ्यां -उदरे ।
श्री श्रीनिवासाभ्यां -वक्षसी । कम्बुकण्ठाभ्यां -कण्ठौ । कोमलदीर्घबाहुभ्यां -बाहून् ।
सौम्यमुखाभ्यां -मुखे। । शुभनासाभ्यां नासे । दिक्शोत्राभ्यां -श्रोत्राणि ।
कर्णान्तनेत्राभ्यां -नेत्राणि । तिलकशोभिताभ्यां -फाले । कमलातत्पतिभ्यां -शिरसी ।
रमारमेशाभ्यां -सर्वाण्यङ्गानि पूजयामि ।
दशाङ्गं गुग्गुलुं धूपं सुगन्धञ्च मनोहरम् ।
आघ्रेयं सर्वभूतानां गृह्णीतं अब्धिवासिनौ ॥ धूपम् ।

त्रिवर्तिं घृतसंयुक्तं वह्निना योजितं मया ।
गृह्णीतं मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥ दीपम् ।
अन्नं चतुर्विधोपेतं नानाव्यञ्जनसंयुतम् ।
भक्ष्यैः फलैश्च विविधैः गृह्णीतं श्रीरमेश्वरौ ॥

नैवेद्यं, आचमनं, ताम्बूलम् ।

नीराजनं सुमाङ्गल्यं कर्पूरेण प्रकल्पितम् ।
भक्त्या प्रदर्शितं नित्यौ भवतं मङ्गलप्रदौ ।

नीराजनं -प्रदक्षिणनमस्कारान् ।

रमारमेशौ जगतामधीशौ प्राच्यां मयूरेशपुरस्य विष्ठितौ ।
तदाज्ञया भक्तजनानुकम्पिनौ देवार्चने धत्तमनुग्रहाज्ञाम् । (प्रार्थना)
अनया पूजया रमारमेशौ प्रीयेताम् ।
(ततः गुणेशाख्यमयूरेश्वरपूजां विदध्यात् । उपोष्य रात्रौ कथाश्रवण
नामसङ्कीर्तन नृत्तगीतादिभिः जागरणां कृत्वा द्वितीयायां तिथौ प्रातः स्नात्वा
कृतनित्यक्रियः, दक्षिणद्वारपूजां कुर्यात् । आश्रया नाम द्वाराध्यक्षा ।
उमामहेश्वरौ अङ्गदेवते ।)
द्वितीयायां दक्षिणद्वाराध्यक्षपूजा ।
सङ्कल्पः -परमेश्वरप्रीत्यर्थं मयूरेश्वरपुरदक्षिणद्वाराध्यक्षदेवतायाः
आश्रयायाः पूजां करिष्ये ।
कलशपूजा ।
आश्रयां भावये देवीं मयूरेश्वरकिङ्करीम् ।
दक्षिणाद्वारसंस्थानां देवभक्तिप्रदां शिवाम् ॥ ध्यायामि ।
आवाहयामि देवि त्वां अभीष्टवरदायिनीम् ।
मयूरेशार्चने मेऽस्तु योग्यता घृणया तव । आवाहयामि ।
आसनं कल्पितं रम्यं स्वर्णरत्नविनिर्मितम् ।
प्रीत्या गृहाण वरदे मत्पापशमनं कुरु ॥ आसनम् ।
कुशाक्षतादिसम्मिश्रं दिव्यतोयमिदं शुभम् ।
पादावनेजनार्थाय दत्तं देवि गृहाण भोः । पाद्यम् ।
अर्घ्यमष्टाङ्गसंयुक्तं हेमपात्रस्थमादरात् ।
गृहीत्वाऽभ्युक्ष्य मां पापाद् विशुद्धं कुरु सर्वदा ॥ अर्घ्यम् ।
आचम्यतां लोकवन्द्ये सर्वाधारस्वरूपिणि ।
शुद्धतोयमिदं क्लृप्तं गृहीत्वा परया मुदा ॥ आचमनम् ।

मधुपर्कं मया दत्तं दधिमध्वाज्यमिश्रितम् ।
गृहाण सर्ववरदे कीर्तिं देहि परां मयि ॥ मधुपर्कः ।
रम्भाफलसिताक्षौद्रघृतक्षीर विमिश्रितम् ।
स्नानं पञ्चामृतेनाद्य कुरुष्वाश्रय देवते ॥ पञ्चामृतस्नानम् ।
गोदावर्याः समानीतं शुद्धतोयमिदं शुभम् ।
स्नानं कुर्वाश्रये देवि मम पापं व्यपोहय । स्नानं आचमनम् ।
दुकूलयुगलं देवि देहालङ्करणाय ते ।
ददामि प्रतिगृह्णीष्व शुभं कुरु सदा मम ॥ वस्त्रम् ।
हारकङ्कणकेयूरनपुरादि प्रकल्पितम् ।
ददाम्याभरणं तुभ्यं स्वीकुरुष्व दयानिधे ॥ आभरणम् ।
चन्दनागरुकर्पूरकुङ्कुमादिविमिश्रितम् ।
विलेपनमिदं रम्यं स्वीकुरुष्व दयानिधे ॥ गन्धम् ।
अक्षतान् धवलान् देवि शालिजानक्षतान् शुभान् ।
गन्धोपरि ददाम्यद्य अक्षतं कुरु मां सदा ॥ अक्षतान् ।
पुष्पाणि च सुगन्धीनि मालतीमल्लिकानि च ।
मालिकानां विशिष्टानि गृहाणाश्रयदेवते ॥ पुष्पाणि ।
अङ्गपूजा -ॐ । ——— नमः ॥ ——- पूजयामि ।
आश्रयायै -पादौ । सर्वाधारायै -गुल्फौ । भक्ताश्रयायै -जङ्घे ।
सुखाश्रयायै -जानुनी । दक्षद्वाराश्रयायै -ऊरू ।
आज्ञाश्रयायै -गुह्यम् । रूपाश्रयायै -कटिम् । नामाश्रयायै -नाभिम् ।
भूताश्रयायै -उदरम् । रत्नाश्रयायै -उरः । गीताश्रयायै -कण्ठम् ।
धनाश्रयायै -हस्तौ । पद्माश्रयायै -मुखम् । विद्याश्रयायै -जिह्वाम् ।
प्राणाश्रयायै -नासिकाम् । शब्दाश्रयायै -श्रोत्रे । वह्न्याश्रयायै -नेत्रे ।
प्रज्ञाश्रयायै-फालं। । योगाश्रयायै -शिरः । सर्वाश्रयायै -सर्वाण्यङ्गानि ।
वनस्पतिरसामिश्र दशाङ्गपरिवर्धितम् ।
दिव्यं धूपं ददाम्यद्य गृह्यतां आश्रयाभिधे ॥ धूपम् ।
साज्यं ज्वालासमायुक्तं वर्तित्रयसमन्वितम् ।
दीपं गृहाण देवेशि दक्षद्वाराधिदेवते ॥ दीपम् ।
नैवेद्यं पायसापूपभक्ष्यलेह्यादिकल्पितम् ।
मृद्वीकादिफलैर्युक्तं सुस्वादु प्रतिगृह्यताम् ॥ नैवेद्यं ताम्बूलम् ।
नीराजनं सुमाङ्गल्यं कर्पूरपरिकल्पितम् ।
गृह्यतां सुभगे रम्ये ममागः क्षम्यतां शिवे । नीराजनं - प्रदक्षिणनमस्कारान् ।

सर्वाश्रये देवि निराश्रयं मां मयूरनाथस्य पदाब्जसंश्रयम् ।
विधेहि तस्यार्चनबद्धचित्तं इन्द्रादिदेवैरपि संस्तुतस्य ॥

उमामहेश्वर पूजा
सङ्कल्पः -मयूरेश्वर दक्षिणाङ्गदेवताभूतोमामहेश्वरपूजां करिष्ये ।
उमामहेश्वरौ ध्याये निर्मलस्फटिकाकृती ।
मयूरेश्वर दक्षाङ्गनायकौ वृषभध्वजौ ॥ ध्यायामि ।
सर्वानन्दमयौ पूर्णौ सर्वविद्येश्वरौ शिवौ ।
आवाहयामि दक्षाङ्गसंस्थितौ सर्वसिद्धिदौ । आवाहयामि ।
आसनं रत्नखचितं रम्यं सिंहावृतं शुभम् ।
पूजार्थं वां प्रयच्छामि सुखेनास्तं चिरन्तनौ ॥ आसनम् ।
पाद्यमाद्यन्तशून्याभ्यां शिवाभ्यां सरिदाहृतम् ।
हिरण्यकलशस्थं तद्गृह्णीतं मम दैवते ॥ पाद्यम् ।
अर्घ्यमष्टाङ्गसंयुक्तं गन्धपुष्पादिमिश्रितम् ।
मत्पापपरिहारार्थं गृह्णीतं परमेश्वरौ ॥ अर्घ्यम् ।
आचम्येतां जगद्वन्द्यौ एलागन्धादिवासितम् ।
परभक्त्या समानीतं सलिलं वरदम्पती ॥ आचमनीयम् ॥

दधिमध्वाज्यसंयुक्तं कांस्यपात्रे प्रतिष्ठितम् ।
मधुपर्कमिदं पूज्यौ गृह्णीतं कृपया मयि ॥ मधुपर्कः ॥

रम्भाज्य शर्कराद्राक्षाफलैः पञ्चामृतं शुभम् ।
स्नानार्थं वां प्रयच्छामि कुरुतं प्रीतिपूर्वकम् ॥ पञ्चामृतस्नानम् ॥

मन्दाकिन्याः समानीतं सुगन्धिजलमुत्तमम् ।
ज्ञानसंशुद्धदेहौ वां स्नातं मम विशुद्धये ॥ स्नानं आचमनम् ॥

अग्निशौचानि वासांसि देहालङ्करणाय तु ।
ददामि परिधत्तं वां मल्लज्जारक्षणाय वै ॥ वस्त्रम् ॥

उपवीतमिदं शुद्धं हेमसूत्रविनिर्मितम् ।
देवौ धारयतं नित्यं मम पापविशुद्धये ॥ उपवीतम् ॥

हारनूपुरकेयूरताटङ्कवलयोर्मिभिः ।
अलङ्कुरुतमाद्यौ वां हेमाकार वपुर्धरौ । आभरणानि ॥

मृगनाभ्यादिसंघृष्टं रक्तचन्दनमुत्तमम् ।

विलिम्पतं सुरश्रेष्ठौ पङ्कं मा लिम्पतं मयि ॥ गन्धान् ॥

बिल्वैर्मन्दारकुसुमैः मल्लिकाचन्दनादिभिः ।
भक्त्या सङ्ग्रथितां मालां प्रतिमुञ्चतमादरात् ॥ पुष्पाणि ॥

अङ्ग पूजा -ॐ......। नमः .... पूजयामि ।
पद्मपादाभ्यां -पादान् । गूढगुल्फाभ्यां -गुल्फान् । वृत्तजङ्घाभ्यां -जङ्घाः ।
सुजानुभ्यां -जानूनि । रम्भोरुभ्यां -ऊरून् । जगज्जनकाभ्यां -गुह्यैः ।
आवर्तनाभिभ्यां -नाभी । मुक्तादिशोभिभ्यां -वक्षसी। । जगज्जीवनाभ्यां -कुचान् ।
कम्बुकण्ठाभ्यां -कण्ठौ । मृदुहस्ताभ्यां -हस्तान् । सौम्यवदनाभ्यां -मुखे ।
सुनासाभ्यां -नासे । मृगाक्षिभ्यां -अक्षीणि । दिक्श्रोत्राभ्यां -श्रोत्राणि ।
विरूपाक्षाभ्यां -फाले । दिव्यमूर्धभ्यां -शिरसी ।
सर्वेश्वराभ्यां -सर्वाण्यङ्गानि ॥

वनस्पतिरसोद्भूतं गुल्गुल्वगरुमिश्रितैः ।
दशाङ्गैर्धूपमेतत्तु गृहीतमपराजितौ ॥ धूपम् ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृह्णीतं आनन्दमयदीपं लोकप्रकाशकम् ॥ दीपम् ॥

चित्रान्नैःर्लड्डुकापूपैः वटकैर्घृतपायसैः ।
निवेदयामि वां देवौ भुञ्जतं परमादरात् ॥ नैवेद्यं ताम्बूलम् ॥

नीराजनं नीरजाक्षौ ज्वलितैर्लक्षवर्तिभिः ।
प्रददामि परेशानौ क्षमेथां मम मन्तुकान् ॥ नीराजनं प्रदक्षिणनमस्कारान् ।
मयूरेश्वराज्ञाविधाने सुदक्षौ भवानीशिवौ दक्षिणद्वारसंस्थौ ।
गुणेशार्चनायामनुज्ञां विधत्तं सदानन्दरूपे मनो मेऽस्तु नित्यम् ॥ (प्रार्थना)
अनया पूजया उमामहेश्वरौ प्रीयेताम् ।
इति समाप्य मयूरेश्वरं अभ्यर्च्य उपवसेत् । रात्रौ जागरणादिः । तृतीयायां
प्रातः स्नात्वा पश्चिमद्वाराध्यक्षदेवतां भोगदां रतिकन्दर्पौ च पूजयेत् ॥

तृतीयायां द्वाराध्यक्षपूजा
सङ्कल्पः । तृतीयायां पश्चिमद्वाराध्यक्षदेवतापूजां करिष्ये ।
कलशपूजा ।
भोगदां चिन्तयामीह सर्वाभरणभूषिताम् ।
मयूरेशाज्ञया प्रत्यग्द्वारनिष्ठां परावराम् ॥ भोगदां ध्यायामि ॥

आवाहयामि देवि त्वां अभीष्टार्थविधायिनीम् ।
परया कृपया मत्तः पूजां स्वीकुरु भोगदे ॥ आवाहयामि ॥

रत्नसिंहासनं देवि मनसा चारु कल्पितम् ।
अत्रासीना मदीयार्चां गृहाणाद्य शुचिस्मिते । आसनम् ॥

उत्तमं पाद्यमानीतं सर्वभोगप्रदायिनि ।
गङ्गादिभ्यः शुचि जलं गृहाण भुवनाधिपे ॥ पाद्यम् ॥

अर्घ्यं गन्धाक्षतसुमैः शुद्धं यच्छामि सादरम् ।
अनर्घभोगदात्री त्वं गृहाण वरदायिनि ॥ अर्घ्यम् ॥

उशीरादिसुगन्धाढ्यं गाङ्गतोयमनुत्तमम् ।
कुरुष्वाचमनं भद्रे सर्वभोगान्प्रयच्छ मे ॥ आचमनम् ॥

मधुपर्कमिदं देवि दधिमध्वाज्यमिश्रितम् ।
मत्पापशमनार्थाय ददाम्याशु गृहाण भो ॥ मधुपर्कः ॥

स्नानं पञ्चामृतं देवि क्षीराज्यमधुशर्करैः ।
दत्तं ते प्रतिगृह्णीष्व पावितं कुरु मां सदा । पञ्चामृतस्नानम् ॥

शुद्धतोयमिदं देवि सुगन्धोशीरवासितम् ।
स्नाहि गङ्गातुङ्गभद्रासरिद्भ्यः सम्यगाहृतम् ॥ स्नानं आचमनम् ॥

दुकूलद्वयमेतत्त्वं वसान परि भोगदे ।
मनः सङ्कल्पितान् भोगान् प्रयच्छ समलङ्कृता । वस्त्रम् ॥

मुक्तामण्यञ्चितं चारु हारं वलयमङ्गदम् ।
सौवर्णरत्नखचितं ददामि प्रतिगृह्यताम् ॥ आभरणानि ॥

गन्धं गृहाण सुरभिं घनमुस्तादिमर्दितम् ।
विलिम्पानेन सर्वाङ्गं मम पङ्कं व्यपोहय ॥ गन्धम् ॥

शोभनग्रथितां मालां कुन्दमन्दारकादिभिः ।
कन्धरे प्रतिमुच्याशु मद्भक्तिं प्रकटी कुरु ॥ पुष्पाणि ॥

अङ्ग पूजा -ॐ ......। -नमः .... पूजयामि ।
भोगदायै -पादौ । धनदायै -गुल्फौ । यशोदायै -जङ्घे । शुभदायै जानुनी ।
बलदायै -ऊरू । पुत्रदायै -गुह्यम् । अन्नदायै -जठरम् । भाग्यदायै -उरः ।
स्वरदायै -कण्ठम् । ज्ञानदायै -मुखम् । रूपदायै -चक्षुः ।

प्राणदायै -नासिके । कीर्तिदायै -श्रोत्रे । शर्मदायै -शिरः ।
भक्तिदायै -सर्वाण्यङ्गानि ।
दशाङ्गधूपितं धूपं मृगशाबाक्षि गृह्यताम् ।
आघ्रेयः सर्वदेवानां जिघ्र सर्वाङ्गशोभने ॥ धूपम् ॥

दीपं वर्तित्रयोपेतं ज्वलितं वह्नितेजसा ।
दर्शयामि मयूरेशप्रत्यग्द्वाराश्रये शुभे ॥ दीपम् ॥

पायसं पिष्टकृसरचित्रान्नापूपशष्कुलीः ।
निवेदयाम्यहं देवि गृहाण परया मुदा ॥ नैवेद्यं ताम्बूलम् ॥

नीराजनं सुमाङ्गल्यं कर्पूरेण विनिर्मितम् ।
सर्वमङ्गललाभाय सङ्कष्टविनिवृत्तये ॥ नीराजनम् ॥ प्रदक्षिणनमस्कारान् ।
श्री भोगदे देवि गुणेशपादपद्मद्वयासक्तमना भवेयम् ।
तथा त्वमेवाशु विधाय तस्य पूजाविधौ देहि परामनुज्ञाम् ॥ (प्रार्थना)
अनया पूजा भोगदा प्रीयताम् ।
रतिकन्दर्प पूजा -
ध्यायामि रतिकन्दर्पं गुणेशाज्ञाविधायिनौ ।
प्रत्यग्द्वाराङ्गसंस्थानौ रूपयौवनशालिनौ ॥ ध्यायामि ॥

आवाहयामि देवेशौ सर्वसुन्दरगात्रिणौ ।
गुणेशपूजा सम्पूर्णफलावाप्तेरभीप्सया ॥ आवाहयामि ॥

आसनं रत्नखचितं आदिदेवौ सुकल्पितम् ।
अत्र स्तं मम पूजार्थं मनोऽभीष्टं प्रयच्छतम् ॥ आसनम् ॥

अनाद्यन्तौ कामदेवौ यवदूर्वादिसंयुतम् ।
पाद्यं ददामि गृह्णीतं मनोनैर्मल्यमस्तु मे ॥ पाद्यम् ॥

अर्घ्यं सुवर्णकरके समानीतं हि सुन्दरौ ।
मम तेजोऽभिवृद्ध्यर्थं गृह्णीतं तोयमुत्तमम् ॥ अर्घ्यम् ॥

सङ्कल्पजौ तोयमिदं दत्तमाचमनाय वाम् ।
उशीरैलालवङ्गादि वासितं स्वादु शीतलम् ॥ आचमनम् ॥

मधुपर्कं ददाम्यादौ दम्पती साधु कल्पितम् ।
दधिमध्वाज्यसंयुक्तं गृह्णीतं परमादरात् ॥ मधुपर्कः ॥

सिद्धं पञ्चामृतमिदं स्नानाय फलसंस्कृतम् ।

गृह्णीतं रतिकन्दर्पौ मम सर्वार्थसिद्धये ॥ पञ्चामृतस्नानम् ॥

कृष्णागोदावरीरेवासरिद्भ्यः परिपूरितम् ।
आनीतं कलशं सम्यक् स्नातं रतिमनोभवौ ॥ स्नानं, आचमनम् ॥

मनोज्ञानीह वस्त्राणि परिधत्तं ददाम्यहम् ।
लज्जासंरक्षणार्थाय महार्घाणि वराणि च ॥ वस्त्राणि ॥

हेमतन्तु प्रक्लृप्तानि हृद्यानि परिशुद्धये ।
दत्तानि परया भक्त्या पूतं मां कुरुतं सदा ॥ उपवीतम् ॥

हारकङ्कणकेयूरमेखलानूपुरादिभिः ।
भक्त्या समर्पितैर्नित्यं अलङ्कुरुतमादरात् ॥ आभरणम् ॥

गन्धं कलयतं फालयुगले मृगनाभिजम् ।
शोभनाय प्रयच्छामि कुरुतं मां सुगन्धिनम् ॥ गन्धम् ॥

पुष्पाणि सुरभीण्यद्य मल्लिकावकुलानि च ।
समर्पयामि गृह्णीतं पश्चिमद्वारवासिनौ ॥ पुष्पाणि ॥

अङ्गपूजा -ॐ ......॥ नमः ....। पूजयामि ।
मनोजाभ्यां -पादान् । मङ्गलमूर्तिभ्यां -गुल्फान् । नित्ययुवभ्यां -जङ्घाः ।
आह्लादकारिभ्यां -जानूनि । अतिसुन्दराभ्यां -ऊरून् । चक्षुरगोचरराभ्यां -गुह्ये ।
अव्यक्तमूर्तिभ्यां -करौ । आनन्दरूपाभ्यां -जठरे । निम्ननाभिभ्यां -नाभी ।
हारशोभिभ्यां -वक्षसी । गानरसिकाभ्यां -कण्ठौ । आजानुबाहुभ्यां -बाहून् ।
शुचिस्मिताभ्यां -मुखे । चम्पकनासाभ्यां -नासिके ।
कुण्डलालङ्कृताभ्यां -कर्णान् । इन्दीवराक्षिभ्यां -अक्षीणि ।
तिलकितफालाभ्यां -फाले । रतिमन्मथाभ्यां -शिरसि ।
चित्तजन्मभ्यां -सर्वाण्यङ्गानि ॥

दशाङ्गचूर्णसम्मिश्रं वरधूपमिदं शुभम् ।
आघ्रापयामि देवेशौ गृह्णीतं करुणाकरौ ॥ धूपम् ॥

दीपं ददामि सुभगौ गुणेशपुरपश्चिमे ।
मुख्याङ्गत्वेन निर्दिष्टौ दिशतं भाग्यमुत्तमम् ॥ दीपम् ॥

मोदकैर्लड्डुकैः पूपैर्वटकैः पूरिकादिभिः ।
नैवेद्यं कारयामीशौ भुञ्जीथां रतिमन्मथौ ॥ नैवेद्यं, आचमनं, ताम्बूलम् ॥

नीराजनं ददाम्याध्यौ सर्वसम्पत्प्रपूरकौ ।
अपराधक्षमायाथ सर्वमङ्गलमस्तु मे ॥ नीराजनम् । प्रदक्षिणनमस्कारान् ।
गुणेशार्चनायां त्वदीयामनुज्ञां
प्रयाचेऽद्य भक्तेर्विवृद्धिं रतीशौ ।
मयूरेशपुर्याः प्रवेशे च योग्यं
विधातुश्च मोदप्रमोदौ यतेथाम् ॥ प्रार्थना ॥

अनया पूजया रतिकन्दर्पौ प्रीयेताम् ॥

(स्नात्वा मयूरेशं सम्पूज्य उपवसेद्रात्रौ जागरणादिभिः ।
 इति तृतीया तिथिपूजां समापयेत् ।)
चतुर्थ्यां प्रातः स्नात्वा कृतनित्यक्रियः उत्तरद्वाराध्यक्षां कामदां
अङ्गदेवौ महीवराहौ च पूजयेत् ।
चतुर्थ्यां द्वाराध्यक्षदेवता पूजा
ध्यायामि कामदां देवीं भक्तकामप्रदायिनीम् ।
गुणेशपत्तनोदीच्यद्वारसंस्थानदेवताम् ॥ कामदां ध्यायामि ॥

आवाहयामि देवि त्वां अभीष्टवरदा भव ।
गुणेशार्चाफलावाप्तिकामोऽहं कामदेवते ॥ आवाहयामि ॥

आसनं कल्पितं रम्यं हेमरत्नविचित्रितम् ।
ददाम्यास्व महादेवि प्रसादं कुरु सर्वदा ॥ आसनम् ॥

हेमकुम्भसमानीतं पादप्रक्षालनाय ते ।
कुशाक्षतादिसम्मिश्रं सलिलं प्रतिगृह्यताम् ॥ पाद्यम् ॥

अर्घ्यमष्टाङ्गसंयुक्तं यवदूर्वादिसंयुतम् ।
कामदे देवि गृह्णीष्व हस्ताभ्यां परमादरात् ॥ अर्घ्यम् ॥

आचम्यतां जगद्वन्द्ये शुद्धतोयं मया हृतम् ।
अन्तःकरणशुद्ध्यर्थं विधेहि करुणां मयि ॥ आचमनम् ॥

मधुपर्कमिदं देवि दधिमध्वाज्यमिश्रितम् ।
गृहाण सर्ववरदे ममारातीन्नुदेश्वरि ॥ मधुपर्कः ॥

स्नानं पञ्चामृतेनैव क्षीरमध्वाज्यशर्करैः ।
सम्पादितेन कामेशि कुरुष्व परया मुदा । पञ्चामृतस्नानम् ॥

गङ्गामरुद्वृधादिभ्यः तोयं हेमघटाहृतम् ।

स्नाहि कल्याणि वरदे मम पापं विशोधय ॥ स्नानं -आचमनम् ॥

वसनं कामदे पीतं सुसूक्ष्मं देवनिर्मितम् ।
परिधत्स्व परेशानि कुरु मां हृष्टमानसम् ॥ वस्त्रम् ।
हारताटङ्ककेयूरनासिकाभरणादिभिः
सङ्कृतैश्च मया रम्यैः कुरु देहमलङ्कृतम् ॥ आभरणानि ।
श्रीखण्डघनसारादिविमिश्रं गन्धमुत्तमम् ।
गृहाण सर्वसुरभिं मम पङ्कं विनाशय ॥ गन्धम् ।
पुष्पमालां विचित्रां च चम्पकाशोकनिर्मिताम् ।
ददामि भूषणार्थाय प्रतिमुञ्च परावरे ॥ पुष्पाणि ।
अङ्गपूजा -ॐ ......। नमः ....॥ पूजयामि ।
कामदायै -पादौ । शर्मदायै -गुल्फौ । तूणजङ्घायै -जङ्घे ।
मुकुटजानवे -जानू । करभोरवे -ऊरू । शुभकट्यै- कटिम् ।
गम्भीरनाभये -नाभिम् । कृशोदर्यै -उदरम् । विशुद्धायै -हृदयम् ।
महोरस्कायै -उरः । शुभकण्ठायै -कण्ठम् । वल्लीभुजायै -बाहू ।
सुमुखायै -मुखम् । सुनसे -नासिकाम् । सुकर्णायै कर्णौ ।
पद्मनेत्रायै -नेत्रे । फलकफालायै -फालम् । सर्वेश्वर्यै -शिरः ।
कामदायै -सर्वाण्यङ्गानि ।
दशाङ्गं गुग्गुलूपेतं सुगन्धि सुमनः प्रियम् ।
आघ्रापयामि ते धूपं गृह्यतां कामदायिनि ॥ धूपम् ।
साज्यं त्रिवर्तिसहितं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥ दीपम् ।
नैवेद्यं षड्रसोपेतं नानाभक्ष्यप्रपूरितम् ।
ददामि कामदे देवि प्रीत्या भुङ्क्ष्व यथा सुखम् ॥ नैवेद्यं, आचमनं, ताम्बूलम् ।
नीराजनं नीरजाक्षि घृताक्तैः पञ्चवर्तिभिः ।
वह्निना योजितैरेतत् गृहीत्वा कुरु मे शिवम् ॥ नीराजनं, प्रदक्षिण नमस्कारः ।
कामार्थदे कामिनि भक्तकामप्रपूरणि त्वं मम देहि कामान् ।
मयूरनाथार्चन भाग्यकामं प्रपन्नमेनं भवती प्रशाधि (क्षमस्व)।
प्रार्थना ।
अनया पूजया कामदा प्रीयताम् ।
महीवराहपूजा ।
ध्यायामि भूवराहौ वां गुणेशाज्ञानुकारिणौ ।

तद्वामाङ्गतयोदीच्यां स्थितौ लोकस्य रक्षकौ ॥ ध्यायामि ।
आवाहयामि भूकोलौ जगदुद्धारकौ मुदा ।
पूजां प्रतिगृह्यतां गुणेशानुग्रहेच्छया । आवाहयामि ।
आसनं रत्नसौवर्णखचितं लक्षणान्वितम् ।
आस्तं पूजाविधानाय परया घृणया मयि ॥ आसनम् ।
पाद्यमाद्यन्तरहितौ मम पापविशुद्धये ।
ददामि कुरुतं प्रीत्या शुद्धतोयमिदं शुभम् ॥ पाद्यम् ।
अर्घ्यं गन्धकुशाग्रैश्च मिश्रितं परिकल्पितम् ।
प्रजापश्चादि वृध्यर्थं गृह्णीतं जलमुत्तमम् ॥ अर्घ्यम् ।
आचम्येतां जगत्पूज्यौ उशीरैलादि वासितम् ।
अम्भः पूतं ददामीशौ नीरोगं कुरुतं च माम् ॥ आचमनम् ।
दधिमध्वाज्यसम्मिश्रं मधुपर्कं मयाऽऽदरात् ।
कल्पितं भूवराहौ वां गृह्णीतममरार्चितौ ॥ मधुपर्कः ।
क्षीराज्य मधुरम्भादि फलैः पञ्चामृतं कृतम् ।
स्नातं महीकिटी मह्यं भक्तिं दत्तं पदाम्बुजे ॥ पञ्चामृतस्नानम् ॥

हेमकुम्भसमानीतशुद्धतोयेन वां सदा ।
अभिषिञ्चामि कृपया समालोकयतं च माम् ॥ स्नानमाचमनं च ।
अब्धिरूपाणि वस्त्राणि नीलपीतादिकान्यपि ।
महार्घ्याणि प्रक्लृप्तानि समाच्छादयतं रसात् ॥ वस्त्रम् ।
हेमसूत्राणि निर्माय प्रदत्तानि वराणि च ।
उपवीतानि गृह्णीतं महीकोलौ परात्परौ ॥ उपवीतम् ॥

सुगन्धं गुणभूतं वां मुस्ताघनरसादिभिः ।
घृष्ट्वा दत्तं प्रगृह्याशु वरदौ भवतं सदा ॥ गन्धान् ।
जातीचम्पकपुन्नागकेतकीवकुलादिभिः ।
ग्रथितां मालिकां चित्रां गृह्णीतं परमादरात् ॥ पुष्पाणि ।
अङ्गपूजा । ॐ .... नमः .... पूजयामि ।
पातालपादाभ्यां -पादान् । महातलगुल्फाभ्यां -गुल्फान् ।
तलातलजङ्घाभ्यां -जङ्घाः । रसातलजानुभ्यां -जानूनि ।
सुतलोरुभ्यां -ऊरू । वितलगुह्याभ्यां -गुह्ये । अतलकटिभ्यां -कटी ।
भूनाभिभ्यां -नाभी । भुवर्जठराभ्यां -जठरे । स्वर्हृदयाभ्यां -हृदये ।
महर्वक्षोभ्यां -वक्षसी । जनोबाहुभ्यां -बाहून् । तपःकण्ठाभ्यां -कण्ठौ ।

सत्यमुखाभ्यां -मुखे । प्राणादिरूपाभ्यां -नासिके । इनेन्दुनेत्राभ्यां -नेत्राणि ।
शब्दरूपाभ्यां -श्रोत्राणि । तिलकितफालाभ्यां -फाले ।
अग्निमूर्धभ्यां -शिरसी । महीवराहाभ्यां -सर्वाण्यङ्गानि ॥।

गुग्गुल्वगरुसम्मिश्रं धूपन्दत्तमिदं प्रभू ।
आघ्रापयामि भूकोलौ सुरभि घ्राणमुत्तमम् ॥ धूपम् ॥

दीपं ददामि वां दिव्यं पञ्चवर्त्यग्नियोजितम् ।
दर्शयामि सुरश्रेष्ठौ मां कटाक्षेण पश्यतम् ॥ दीपम् ॥

अन्नं चतुर्विधोपेतं भुञ्जाथां आदिभूकिटी ।
नानाभक्ष्यफलोपेतं नैवेद्यं कल्पितं मया ॥ नैवेद्यताम्बूले ।
नीराजनं महीकोलौ कर्पूरेण कृतं मया ।
सर्वमङ्गललाभायाप्यपराधक्षमाय च ॥ नीराजनं प्रदक्षिणनमस्कारौ ।
नित्यौ विशुद्धौ महीकोलरूपौ गुणेशार्चनायामनुज्ञां विधत्तम् ।
त्रिमूर्तिस्वरूपे मयूरेश्वरे मां पदाम्भोजभक्तं नतं ब्रूतमारात् ॥

अनया पूजया महीवराहौ प्रीयेताम् ॥

गुणेशपूजाक्रमः ।
प्रातः स्नात्वा, माध्याह्निकक्रियां समाप्य श्लक्ष्णां शुद्धां पाषाणशर्करादिवर्जितां
मृदमानीय ब्रह्मविष्णुरुद्रात्मकत्वेन त्रिमुखं शुण्डाविराजितं
शूर्पकर्णादिलक्षणयुक्तं षड्भुजं पाशाङ्कुश
चक्रत्रिशूल-परशु-मोदक स्वदन्तचिह्नितं
पार्श्वस्थमयूरसहितं देवं निर्माय, चतुर्द्वारसहितं
सोपानत्रयसहितं मण्डपं
विरच्य, तत्र देवं प्रतिष्ठाप्य, पूर्वोक्तविधिना द्वारदेवताः
अङ्गदेवताश्च सम्पूज्य,
मयूरेश्वरपूजां करिष्ये इति सङ्कल्प्य, भूशुद्धिं,
भूतशुद्धिं, मातृकान्यासं, दीपपूजां,
घण्टापूजां कलशशङ्खपूजां आत्मपूजां च कुर्यात् ।
हृत्पद्मकर्णिकामध्यात् आगच्छत्वं गणेश्वर ।
सिद्ध्या बुद्ध्या च सहितः सगणः सन्निधिं कुरु ।
(इति हृदयपद्मादागतं बिम्बे विभाव्य, यथाशक्ति मूलमन्त्रं जप्त्वा बिम्बे
समर्पयेत् ।)

आधारशक्तिकमलासनाय नमः । तीव्रा - ज्वालिनी - नन्दा - भोगदा -
कामरूपिणी - उग्रा - तेजोवती - सत्या - विघ्ननाशिन्याख्य पीठशक्तिभ्यो
नमः । (प्राणान्प्रतिष्ठाप्य, षोडशभिः उपचारैः उपचर्य, नीराजनानन्तरं
एकविंशति दूर्वाः समर्प्य पञ्चावरणदेवतापूजां कुर्यात् । उत्तराङ्गत्वेन मूलमन्त्रजपं
कृत्वा देवहस्ते समर्पयेत् । रात्रौ जागरणं कृत्वा उपोष्य प्रातः स्नात्वा कृतनित्यक्रियः,
स्वगृह्योक्तविधिना अग्निं प्रतिष्ठाप्य इक्षु - सक्तु - रम्भाफल - पृथुक -
तिल - मोदक - नारिकेल - लाजाख्याष्टद्रव्यैः यथाशक्ति जुहुयात् । पारणां
समाप्य परेद्युः प्रातः पूजां विधाय बिम्बं शिबिकामारोप्य बालैः दण्डक्रीडा
वाद्यघोषपुरःसरं बिम्बं जले विसृजेत् । इति सङ्ग्रहः ।

पूजाविधिः

नभस्ये शुक्लपक्षे तु चतुर्थ्यामर्चितो मया ।
कृता च विधिवन्मूर्तिः मृण्मयी सौम्यदर्शना ॥

गिरिजाऽभीष्टसिद्ध्यर्थं तस्यामाविरभूः किल ।
अनेकाक्षिशिरः पादबाहु कर्णायुधः स्वयम् ॥

विश्वरूपस्य भवतो दर्शने गिरिजा भयात् ।
तुष्टाव परया भक्त्या तस्यै तुष्टो वरं ह्यदाः ॥

बालक्रीडनार्थाय बालरूपोऽभवस्तदा ।
पूजार्थं तादृशं रूपं संस्मरामि गजानन ॥

ब्रह्मविष्ण्वीशवदनं शुण्डारदनशोभितम् ।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥

पाशाङ्कुशौ चक्रशूलौ पर्शुमोदकदन्तकान् ।
बिभ्राणं षड्भुजैः सम्यक् गुणेशाभिधमीश्वरम् ॥

वामदक्षिण भागस्थ सिद्धिबुद्धिसमावृतम् ।
हारताटङ्ककेयूरमुकुटाद्धि विराजितम् ॥ २४२
पीताम्बरधरं फालचन्द्रं भास्वरविग्रहम् ।
नागकक्षोदरा बन्धं नागयज्ञोपवीतिनम् ॥

सिन्दूरितमहाकुम्भं शूर्पकर्णमुपास्महे ॥ ध्यानम् ।
(प्राणप्रतिष्ठां कृत्वा)
अत्रागच्छ मयूरेश ब्रह्मादिमुनिवन्दित ।
आवाहयामि बिम्बेऽस्मिन् मम पूजां गृहाण भो ॥

सहस्त्रशीर्षा + दशाङ्गुलम् । आवाहयामि ।
स्वर्णसिंहासनं चारु नवरत्नविचित्रितम् ।
सुखेनास्व गुणेशान भक्तिं देहि पदाम्बुजे ॥

पुरुष एवे + रोहति । आसनं समर्पयामि ।
पादौ प्रक्षालयामीश यवदूर्वाक्षतादिभिः ।
पुष्पादिभिश्च संशुद्धगङ्गादिसलिलैः शुभैः ॥

एतावानस्य + दिवि । पाद्यं समर्पयामि ।
मयूरेश ददाम्यर्घ्यं कुशपुष्पादिमिश्रितम् ।
गृहाण सर्ववरद प्रजासन्ततिरस्तु मे ॥

त्रिपादूर्ध्व + अभि । अर्घ्यं समर्पयामि ।
ददाम्याचमनीयं ते मधुपर्कपुरस्तनम् ।
उशीरवासितं तोयं गङ्गाया उद्धृतं शुभम् ॥

तस्माद्विरा + पुरः । आचमनीयं समर्पयामि ।
मधुपर्कमिदं रम्यं दधिमध्वाज्यमिश्रितम् ।
गुणेश कांस्यपात्रस्थं अन्नवान्स्यां गृहाण भोः ॥

यत्पुरुषेण + हविः । मधुपर्कः ।
सिता -क्षीराज्य -मधुभिः रम्भाखर्जूरकादिभिः ।
फलैः पञ्चामृतं कॢप्तं स्नानाय प्रतिगृह्यताम् ॥

पञ्चामृतस्नानं समर्पयामि ।
गङ्गागोदावरीकृष्णातुङ्गभद्रासमाहृतम् ।
हेमकुम्भैरिदं शुद्धं सुगन्धि स्नाहि निर्मलम् ॥

तं य ज्ञं + श्च ये । स्नानं समर्पयामि । आचमनं समर्पयामि ।
पीताम्बरयुगं सूक्ष्मं रुक्मतन्तु विचित्रितम् ।
मयूरेश गृहाण त्वं परिधेहि मुदा मयि ॥

तस्माद्यज्ञात् + ये । वस्त्रे समर्पयामि ।
उपवीतमिदं शुभ्रं मया भक्त्या प्रकल्पितम् ।
सर्वपापविशुद्ध्यर्थं गृहाण परमादरात् ॥

तस्माद्यज्ञात् + अजायत । उपवीतं समर्पयामि ।

किरीटहारकटककिङ्किणीनूपुरादिभिः ।
अलङ्कुरु मयूरेश शोभायै सार्वकालिकम् ॥

भूषणानि समर्पयामि ।
धनकेसरकस्तूरी रोचना चन्दनादिभिः ।
विघृष्टगन्धं सुरभि लेपनार्थं ददामि ते ॥

तस्मादश्वा + वयः । गन्धान्धारयामि ।
अक्षतांश्च मयूरेश कुङ्कुमाक्तान् गृहाण भो ।
समर्पितान्मया भक्त्या अक्षतं कुरु मां सदा ॥

अक्षतान्समर्पयामि ।
चम्पकाशोकपुन्नागकेतकीवकुलादिभिः ।
नन्दनाहृतपुष्पैश्च अर्पयाम्यद्य मालिकाम् ॥

यत्पुरुषं + वुच्येते । पुष्पमालां समर्पयामि ।
मल्लिकामालती जातीबिल्वैः मरुवकैः सुमैः ।
सौगन्धिकैः शमीपत्रैः दूर्वाभिः पूजयाम्यहम् ॥

पुष्पाणि समर्पयामि ।
अङ्गपूजा -ॐ .... नमः .... पूजयामि ।
गुणेशाय -पादनखानि । सत्वाय -पादाङ्गुलीः । रजसे -पादतलम् ।
तमसे -पादौ । पृथिव्यात्मने -गुल्फम् । अबात्मने -जङ्घे ।
तेजोरूपिणे -जानुनी । वाय्वात्मने -ऊरू । आकाशात्मने -गुह्यम् ।
गन्धात्मने -कटिम् । रसात्मने -जठरम् । रूपात्मने -नाभिम् ।
स्पर्शात्मने -वक्षः । शब्दात्मने - हृदयम् । कम्बुग्रीवाय -कण्ठम् ।
भिन्नदन्ताय -दन्तम् । शुण्डामुखाय -नासिकाम् । वक्रतुण्डाय -मुखम् ।
वाणीजिह्वाय -जिह्वाम् । शूर्पकर्णाय -कर्णौ । विश्वनेत्रे - नेत्रे ।
फालचन्द्राय -फालम् । सोमार्कघण्टाय -मस्तकम् । मयूरेशाय -शिरः ।
गुणेशाय -सर्वाण्यङ्गानि ॥ (सहस्रनामाद्यैरर्चनं कुर्यात् ।)
ददामि धूपं देवेश दशाङ्गेन सुधूपितम् ।
मयूरेश गृहाण त्वं मम पापापनुत्तये ॥

ब्राह्मणोऽस्य + अजायत । धूपमाघ्रापयामि ।
साज्यं त्रिवर्तिसंयुक्तं वह्निना ज्वालितं मया ।
मयूरेश गृहाणेमं मदान्ध्यं विनिवारय ॥

चन्द्रमा + अजायत । दीपं समर्पयामि ॥

मोदकान् लड्डुकान् पूपान् वटकान् पर्पटान् कृतान् ।
शष्कुलीः पूरिकाश्चैव कृसराणि घृताचितान् ।
अन्नानि च विचित्राणि स्वादूनि सुरभीणि च ।
शर्करामुद्गहारिद्र मिश्रितान्नानि भूरिशः ।
कल्पितानि मयूरेश नैवेद्यं भुङ्क्ष्व सादरम् ।
बह्वन्नं कुरु मां देव त्वत्कटाक्षावलोकनात् ॥

नाभ्या + अकल्पयन् । महानैवेद्यं निवेदयामि ।
आचमनं समर्पयामि ।
पूगैलारेणुकाभृङ्गकर्पूरादिसुवासितैः ।
नागवल्लीदलैश्चर्णैः ताम्बूलं सङ्गृहाण भोः ॥

ताम्बूलं समर्पयामि ।
लक्षवर्ति ज्वालितेन दीपेन परिकल्पितम् ।
आरार्तिकमिदं देव मङ्गलार्थं ददामि ते ॥

सप्तास्यासन् + पशुम् । नीराजनं दर्शयामि ।
वैदिकैर्लौकिकैर्मन्त्रैः मन्त्रितानि सुमानि च ।
अपराधक्षमार्थाय चार्पयामि पदाम्बुजे ॥

मन्त्रपुष्पं समर्पयामि ।
सौवर्णीं दक्षिणां सिद्धिबुद्धिद्वयविशेषित ।
अर्पयामि पदाम्भोजे कटाक्षेणाव मां सदा ॥

स्वर्णपुष्पं समर्पयामि ।
प्रदक्षिणत्रयं कुर्यां सर्वपापप्रणाशनम् ।
त्वत्प्रसादात् वाजिमेधफलं प्राप्नोमि नित्यशः ॥

प्रदक्षिणं समर्पयामि ।
सहस्रशो नमामीशमपराधान् क्षमापये ।
वैदिकैर्लौकिकैः स्तोत्रैः स्तुवे सर्वार्थसिद्धये ॥

नमस्करोमि ।
यज्ञेन यज्ञं + देवाः । प्रार्थये ।
जगद्बीजमेकं चिदानन्दरूपं शिवाद्यैरचिन्त्यं महायोगिवन्द्यम् ।

त्रिमूर्तिस्वरूपं मयूराभिधानं परेशं गुणेशं पराशक्तिसूनुम् ।
कृपातो भवानीमनोऽभीष्टसिद्ध्यै महीमूर्तितो यः समाविर्बभौ हि ।
तमीशं गुणेशं कृपादृष्टिलेशप्रसादार्थं आनन्दपूर्णं भजेऽहम् ।
दूर्वायुग्मार्पणं -ॐ नमः । दूर्वायुग्मं समर्पयामि ।
गणञ्जयाय । गणपतये । हेरम्बाय । धरणीधराय । महागणपतये ।
लक्षप्रदाय (यक्षेश्वराय ।)क्षिप्रप्रसादनाय । अमोघसिद्धये । अमिताय
(अमृताय)मन्त्राय । चिन्तामणये । निधये । सुमङ्गलाय । बीजाय ।
आशापूरकाय । वरदाय । शिवाय । काश्यपाय । नन्दनाय ।
वाचासिद्धाय (वाचां सिद्धये)ढुण्ढिविनायकाय ।
आवरणपूजा । ....पूजयामि नमः ।
प्रथमावरणे -हृदयदेवताम् । शिरोदेवताम् । शिखादेवताम् । कवचदेवताम् ।
नेत्रदेवताम् । अस्त्रदेवताम् ।
द्वितीयावरणे -विद्याम् । विधात्रीम् । भोगदाम् । विघ्नघातिनीम् । निधिप्रियाम् ।
पापघ्नीम् । पुण्याम् । शशिप्रभाम् ।
तृतीयावरणे -वक्रतुण्डम् । एकदंष्ट्रम् । महोदरम् । गजास्यम् । लम्बोदरम् ।
विकटम् । विघ्नराजम् । धूम्रवर्णम् ।
चतुर्थावरणे -इन्द्रम् । अग्निम् । यमम् । निर्ऋतिम् । वरुणम् । वायुम् । कुबेरं
(सोमं)। ईशानम् ।
पञ्चमावरणे -वज्रायुधदेवताम् । शक्त्यायुधदेवताम् । दण्डायुधदेवताम् ।
खड्गायुधदेवताम् । पाशायुधदेवताम् । अङ्कुशायुधदेवताम् । गदायुधदेवताम् ।
शूलायुधदेवताम् ।
ॐ गं गणपतये नमः । इति मध्ये गणेशं पुष्पाञ्जलिभिः समभ्यर्च्य
निवेदनादिकं कुर्यात् । यथाशक्ति मूलमन्त्रं जप्त्वा देवाय समर्पयेत् । मया
कृतेन साङ्गगुणेशार्चनेन परमेश्वरः प्रीतो भवतु । इति पूजां समर्पयेत् । अन्यत्
क्रमे पूर्वं निर्दिष्टम् ।

इति मयूरेश्वरपूजा सम्पूर्णा ।

Proofread by Narendran Madathil

Mayureshvara Puja

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*